# નવગ્રહાણાં સમુચ્ચયાષ્ટોત્તરશતનામાવલિઃ

આદિત્યચન્દ્રૌ કુજસૌમ્યજીવ-શ્રીશુક્રસૂર્યાત્મજરાહુકેતૂન્ ।
નમામિ નિત્યં શુભદાયકાસ્તે ભવન્તુ મે પ્રીતિકરાશ્ચ સર્વે ॥

ૐ ગ્રહનાયકેભ્યો નમઃ ।
ૐ લોકસંસ્તુતેભ્યો નમઃ ।
ૐ લોકસાક્ષિભ્યો નમઃ ।
ૐ અપરિમિતસ્વભાવેભ્યો નમઃ ।
ૐ દયામૂર્તિભ્યો નમઃ ।
ૐ સુરોત્તમેભ્યો નમઃ ।
ૐ ઉગ્રદણ્ડેભ્યો નમઃ ।
ૐ લોકપાવનેભ્યો નમઃ ।
ૐ તેજોમૂર્તિભ્યો નમઃ ।
ૐ ખેચરેભ્યો નમઃ । ૧૦
ૐ દ્વાદશરાશિસ્થિતેભ્યો નમઃ ।
ૐ જ્યોતિર્મયેભ્યો નમઃ ।
ૐ રાજીવલોચનેભ્યો નમઃ ।
ૐ નવરત્નાલઙ્કૃતમકુટેભ્યો નમઃ ।
ૐ માણિક્યભૂષણેભ્યો નમઃ ।
ૐ નક્ષત્રાધિપતિભ્યો નમઃ ।
ૐ નક્ષત્રાલઙ્કૃતવિગ્રહેભ્યો નમઃ ।
ૐ શક્ત્યાદ્યાયુધધારિભ્યો નમઃ ।
ૐ ચતુર્ભુજાન્વિતેભ્યો નમઃ ।
ૐ સકલસૃષ્ટિકર્તૃભ્યો નમઃ । ૨૦
ૐ સર્વકર્મપયોનિધિભ્યો નમઃ ।
ૐ ધનપ્રદાયકેભ્યો નમઃ ।
ૐ સર્વપાપહરેભ્યો નમઃ ।
ૐ કારુણ્યસાગરેભ્યો નમઃ ।
ૐ સકલકાર્યકણ્ઠકેભ્યો નમઃ ।
ૐ ઋણહર્તૃભ્યો નમઃ ।
ૐ ધાન્યાધિપતિભ્યો નમઃ ।
ૐ ભારતીપ્રિયેભ્યો નમઃ ।
ૐ ભક્તવત્સલેભ્યો નમઃ ।
ૐ શિવપ્રદાયકેભ્યો નમઃ । ૩૦
ૐ શિવભક્તજનરક્ષકેભ્યો નમઃ ।
ૐ પુણ્યપ્રદાયકેભ્યો નમઃ ।
ૐ સર્વશાસ્ત્રવિશારદેભ્યો નમઃ ।
ૐ સુકુમારતનુભ્યો નમઃ ।
ૐ કામિતાર્થફલપ્રદાયકેભ્યો નમઃ ।
ૐ અષ્ટૈશ્વર્યપ્રદાયકેભ્યો નમઃ ।
ૐ બ્રહ્મવિદ્ભ્યો નમઃ ।
ૐ મહદ્ભ્યો નમઃ ।
ૐ સાત્વિકેભ્યો નમઃ ।

PORTLAND PANDIT

ૐ સુરાધ્યક્ષેભ્યો નમઃ । ૪૦
ૐ કૃત્તિકાપ્રિયેભ્યો નમઃ ।
ૐ રેવતીપતિભ્યો નમઃ ।
ૐ મઙ્ગલકરેભ્યો નમઃ ।
ૐ મતિમતાં વરિષ્ઠેભ્યો નમઃ ।
ૐ માયાવિવર્જિતેભ્યો નમઃ ।
ૐ સદાચારસમ્પન્નેભ્યો નમઃ ।
ૐ સત્યવચનેભ્યો નમઃ ।
ૐ સર્વસમ્મતેભ્યો નમઃ ।
ૐ મધુરભાષિભ્યો નમઃ ।
ૐ બ્રહ્મપરાયણેભ્યો નમઃ । ૫૦
ૐ સુનીતિભ્યો નમઃ ।
ૐ વચનાધિકેભ્યો નમઃ ।
ૐ શિવપૂજાતત્પરેભ્યો નમઃ ।
ૐ ભદ્રપ્રિયેભ્યો નમઃ ।
ૐ ભાગ્યકરેભ્યો નમઃ ।
ૐ ગન્ધર્વસેવિતેભ્યો નમઃ ।
ૐ ગમ્ભીરવચનેભ્યો નમઃ ।
ૐ ચતુરેભ્યો નમઃ ।
ૐ ચારુભૂષણેભ્યો નમઃ ।
ૐ કામિતાર્થપ્રદેભ્યો નમઃ । ૬૦
ૐ સકલજ્ઞાનવિદ્ભ્યો નમઃ ।
ૐ અજાતશત્રુભ્યો નમઃ ।
ૐ અમૃતાશનેભ્યો નમઃ ।
ૐ દેવપૂજિતેભ્યો નમઃ ।
ૐ તુષ્ટેભ્યો નમઃ ।
ૐ સર્વાભીષ્ટપ્રદેભ્યો નમઃ ।
ૐ ઘોરેભ્યો નમઃ ।
ૐ અગોચરેભ્યો નમઃ ।
ૐ ગ્રહશ્રેષ્ઠેભ્યો નમઃ ।
ૐ શાશ્વતેભ્યો નમઃ । ૭૦
ૐ ભક્તરક્ષકેભ્યો નમઃ ।
ૐ ભક્તપ્રસન્નેભ્યો નમઃ ।
ૐ પૂજ્યેભ્યો નમઃ ।
ૐ ધનિષ્ઠાધિપેભ્યો નમઃ ।
ૐ શતભિષક્પતિભ્યો નમઃ ।
ૐ આમૂલાલઙ્કૃતદેહેભ્યો નમઃ ।
ૐ બ્રહ્મતેજોઽભિવર્ધનેભ્યો નમઃ ।
ૐ ચિત્રવર્ણેભ્યો નમઃ ।
ૐ તીવ્રકોપેભ્યો નમઃ ।
ૐ લોકસ્તુતેભ્યો નમઃ । ૮૦
ૐ જ્યોતિષ્મતાં પરેભ્યો નમઃ ।
ૐ વિવિક્તનેત્રેભ્યો નમઃ ।
ૐ તરણેભ્યો નમઃ ।

PORTLAND PANDIT

ૐમિત્રેભ્યોનમઃ।
ૐદિવૌકોભ્યોનમઃ।
ૐદયાનિધિભ્યોનમઃ।
ૐમકુટોજ્જ્વલેભ્યોનમઃ।
ૐવાસુદેવપ્રિયેભ્યોનમઃ।
ૐશઙ્કરેભ્યોનમઃ।
ૐયોગીશ્વરેભ્યોનમઃ।૯૦
ૐપાશાઙ્કુશધારિભ્યોનમઃ।
ૐપરમસુખદેભ્યોનમઃ।
ૐનભોમાણ્ડલસંસ્થિતેભ્યોનમઃ।
ૐઅષ્ટસૂત્રધારિભ્યોનમઃ।
ૐઓષધીનાંપતિભ્યોનમઃ।
ૐપરમપ્રીતિકરેભ્યોનમઃ।
ૐકુણ્ડલધારિભ્યોનમઃ।
ૐનાગલોકસ્થિતેભ્યોનમઃ।
ૐશ્રવણાધિપેભ્યોનમઃ।
ૐપૂર્વાષાઢાધિપેભ્યોનમઃ।૧૦૦
ૐઉત્તરાષાઢાધિપેભ્યોનમઃ।
ૐપીતચન્દનલેપનેભ્યોનમઃ।
ૐઉડુગણપતિભ્યોનમઃ।
ૐમેષાદિરાશીનાંપતિભ્યોનમઃ।
ૐસુલભેભ્યોનમઃ।
ૐનીતિકોવિદેભ્યોનમઃ।
ૐસુમનસેભ્યોનમઃ।
ૐ આદિત્યાદિનવગ્રહદેવતાભ્યો નમઃ૧૦૮

ઈતિ

PORTLAND PANDIT